कर्णौ मूले खरध्वंसी तालु मे रघुवल्लभः॥ जिह्वां मे वाक्पतिः पातु दन्तपंक्ती रघूत्तमः
ओष्ठौ मे श्रीरामचन्द्रो मे मुखं पातु परात्परम्॥२०॥ कण्ठं पातु जगद्वन्द्यः स्कन्धौ
मे रावणान्तकः॥ धनुर्बाणधरः पातु भुजौ मे वालिमर्द्दनः॥२१॥ सर्वाण्यङ्गुलि
पर्वाणि हस्तौ मे राक्षसान्तकः वक्षो मे पातु काकुत्स्थः पातु मे हृदयं हरिः॥२२॥
1 स्तनौ सीतापतिः पातु पार्श्वौ मे जगदीश्वरः॥ मध्यं मे पातु लक्ष्मीशो नाभिं
॥२॥ मे रघुनायकः॥२३॥ कौशल्येयः कटिं पातु पृष्ठं दुर्गतिनाशनः॥ गुह्यं पातु हृषीके ॥२॥
शः॥ सक्थिनी सत्यविक्रमः॥२४॥ ऊरू शार्ङ्गधरः पातु जानुनी हनुमत्प्रियः
जंघे पातु जगद्व्यापी पादौ मे ताडकान्तकः॥२५॥ सर्वाङ्गं पातु मे विष्णुः सर्वसं
धीन नामयः॥ ज्ञानेन्द्रियाणि प्राणादीन् पातु मे मधुसूदनः॥२६॥ पातु श्री
रामभद्रो मे शब्दादीन्विषयानिमे॥ द्विपाद्यादीनि नामानि मत्संधीनि
यानि च॥२७॥ जाम्बवत्सेव्य सहा दर्पदलनः पातु तानि मे॥ सौमित्रिसेवितः

साजिनधरं भस्मधूलितविग्रहम् ॥१०॥ आकर्णपूरमाकृष्य कोदण्डं भुजम
ण्डनम् ॥ रक्षोरिपून् रावणादीन् तीक्ष्णबाणैः शरैरविभिः ॥११॥ संहरन्तं महावी
रं मग्नमैन्द्रं प्रस्थितम् ॥ जलस्थं रामाख्यं महावीरैर्वृतं हनुमतादिभिः ॥१२॥ सु
ग्रीवाद्यैर्महावीरैः शैलवृक्षानलायुधैः ॥ वेगात्स्थिता घहंकारैर्वृतं कृतम
हारवैः ॥१३॥ नदद्भिरुग्रधावद्भिः समरे रावणं प्रति ॥ श्रीराम शत्रुसंघान्मे
हन्ति मर्दय खादय ॥१४॥ भूतप्रेतपिशाचादीन् श्रीरामाशु विनाशय ॥ एवं
ध्यात्वा जपेद्राम कवचं वज्रसंज्ञितम् ॥१५॥ सुनीरवा वज्रकवचं शत्रुपरिपा
न्थनुत्तमम् ॥ ॐ अस्य श्रीरामवज्रकवचस्य श्रीरामचन्द्रो देवता श्रीराम
चन्द्रप्रीत्यर्थे जपे विनियोगः ॥ रामश्च पातु मे मूर्ध्नि तत्पूर्वं रघुवंशजः ॥१६॥
दक्षिणे मे रघुवरः पश्चिमे पातु वामनः ॥ उत्तरे मे रघुपतिर्भालं दशरथा
त्मजः ॥१७॥ भ्रुवो दूर्वादलश्यामस्तयोर्मध्ये जनार्दनः ॥ श्रोत्रं मे पातु राजे
न्द्रो दृशौ राजीवलोचनः ॥१८॥ घ्राणं मे पातु राजर्षिर्गण्डौ मे जानकीपतिः

पातु वागादीनीन्द्रियाणि च ॥ २८ ॥ रामकृपास्य शेषाणि पातु सुग्रीवराज्यदः
वाङ्मनोबुद्ध्यहंकारैर्ज्ञानाज्ञानकृतानि च जन्मान्तरकृतानीह पापानि
विविधानि वै ॥ तानि सर्वाणि दग्ध्वाशु हरकोदण्डखण्डनः ॥ ३० ॥ पातु मे
सर्वतो रामः शार्ङ्गबाणधरः सदा ॥ इति श्रीरामचन्द्रस्य कवचं वज्रसंज्ञितम्
॥ ३१ ॥ गुह्याद्गुह्यतमं दिव्यं सुतीक्ष्णमुनिसत्तम ॥ यः पठेच्छृणुयाद्वापि श्र
॥ ३ ॥ ावयेद्वा समाहितः ॥ ३२ ॥ स याति परमं स्थानं रामचन्द्रप्रसादतः ॥ महा ॥ ३ ॥
पातकयुक्तो वा गोघ्नो वा भ्रूणहा तथा ॥ ३३ ॥ रामचन्द्रस्य कवचं पठनाच्छुद्धि
२ माप्नुयात् ॥ ज्वरापस्मारकुष्ठादिव्याधिभिः पीडितोऽपि सन् ॥ ३४ ॥ त्रिवारं
जले स्थित्वा जप्त्वा शान्तिमवाप्नुयात् ॥ श्रीरामवज्रकवचं पठनाद्विज
यी भवेत् ॥ ३५ ॥ यः करे धारयेत्तस्य कवचं वज्रसंज्ञितम् ॥ आयुरारोग्य
मैश्वर्यं भवेन्नत्र न संशयः ॥ ३६ ॥ अपुत्रो लभते पुत्रमधनो धनमाप्नु
यात् ॥ यं यं काममपेक्षेत कामं तं तं प्राप्नोत्यसंशयः ॥ ३७ ॥ इति श्रीपरमरह
स्ये अगस्तिप्रोक्तं रामवज्रकवचं सम्पूर्णम् ॥ शुभमस्तु शुभं भूयात् ॥ = ॥

3

श्रीरामचंद्रकवचंसमाप्तम्

श्री

रा॰
४